# अथ चन्द्रकवचम्

समं चतुर्भुजं वन्दे केयूरमुकुटोज्ज्वलम् ।

वासुदेवस्य नयनं शङ्करस्य च भूषणम्

एवं ध्यात्वा जपेन्नित्यं शशिनः कवचं शुभम् ।

शशी पातु शिरोदेशं भालं पातु कलानिधिः ।।

चक्षुषी चन्द्रमा पातु श्रुती पातु निशापतिः ।

प्राणं क्षपाकरः पातु मुखं कुमुदबान्धवः ।।

पातु कण्ठं च मे सोमः स्कन्धे जैवातृकस्तथा ।

करौ सुधाकरः पातु वक्षः पातु निशाकरः ।।

हृदयं पातु मे चन्द्रो नाभिं शङ्करभूषणः ।

मध्यं पातु सुरश्रेष्ठ: कटिं पातु सुधाकरः ।।

ऊरू तारापतिः पातु मृगाङ्को जानुनी सदा ।

अब्धिजः पातु मे जो पातु पादौ विधुः सदा।।

सर्वाण्यन्यानि चाङ्गानि पातु चन्दोऽखिलं वपुः ।

एतद्धि कवचं दिव्यं भुक्तिमुक्तिप्रदायकम् ।

यः पठेच्छृणुयाद्वाऽपि सर्वत्र विजयी भवेत् । ।7 ||

।। इति श्री चन्द्रकवचम् सम्पूर्णम् ।।

www.astromanu.com

mob no-7983298169